श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ चतुः षष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ चतुः षष्टितमः सर्गः ॥

## दधिमुखतः सुग्रीवसन्देशमाकर्ण्याङ्गदहनुमदादीनां वानराणां किष्किन्धायां गमनं हनुमता श्रीरामं प्रणम्य सीतादर्शनसमाचारस्य निवेदनं च

सुग्रीवेणैवमुक्तस्तु हृष्टो दधिमुखः कपिः।
राघवं लक्ष्मणं चैव सुग्रीवं चाभ्यवादयत्॥ **5.64.1** ॥

स प्रणम्य च सुग्रीवं राघवौ च महाबलौ।
वानरैः सहितः शूरैर्दिवमेवोत्पपात ह॥ **5.64.2** ॥

स यथैवागतः पूर्वं तथैव त्वरितं गतः।
निपत्य गगनाद् भूमौ तद्वनं प्रविवेश ह॥ **5.64.3** ॥

स प्रविष्टो मधुवनं ददर्श हरियूथपान्।
विमदानुद्धतान् सर्वान् मेहमानान् मधूदकम्॥ **5.64.4** ॥

स तानुपागमद् वीरो बद्ध्वा करपुटाञ्जलिम्।
उवाच वचनं श्लक्ष्णमिदं हृष्टवदङ्गदम्॥ **5.64.5** ॥

सौम्य रोषो न कर्तव्यो यदेभिः परिवारणम्।
अज्ञानाद् रक्षिभिः क्रोधाद् भवन्तः प्रतिषेधिताः॥ **5.64.6** ॥

श्रान्तो दूरादनुप्राप्तो भक्षयस्व स्वकं मधु।
युवराजस्त्वमीशश्च वनस्यास्य महाबल॥ **5.64.7** ॥

मौर्ख्यात् पूर्वं कृतो रोषस्तद् भवान् क्षन्तुमर्हति।
यथैव हि पिता तेऽभूत् पूर्वं हरिगणेश्वरः॥ **5.64.8** ॥

तथा त्वमपि सुग्रीवो नान्यस्तु हरिसत्तम।
आख्यातं हि मया गत्वा पितृव्यस्य तवानघ॥ **5.64.9** ॥

इहोपयानं सर्वेषामेतेषां वनचारिणाम्।
भवदागमनं श्रुत्वा सहैभिर्वनचारिभिः॥ **5.64.10** ॥

प्रहृष्टो न तु रुष्टोऽसौ वनं श्रुत्वा प्रधर्षितम्।
प्रहृष्टो मां पितृव्यस्ते सुग्रीवो वानरेश्वरः॥ **5.64.11** ॥

शीघ्रं प्रेषय सर्वांस्तानिति होवाच पार्थिवः।
श्रुत्वा दधिमुखस्यैतद् वचनं श्लक्ष्णमङ्गदः॥ **5.64.12** ॥

अब्रवीत् तान् हरिश्रेष्ठो वाक्यं वाक्यविशारदः।
शङ्के श्रुतोऽयं वृत्तान्तो रामेण हरियूथपाः॥ **5.64.13** ॥

अयं च हर्षादाख्याति तेन जानामि हेतुना।
तत् क्षमं नेह नः स्थातुं कृते कार्ये परन्तपाः॥ **5.64.14** ॥

पीत्वा मधु यथाकामं विक्रान्ता वनचारिणः।
किं शेषं गमनं तत्र सुग्रीवो यत्र वानरः॥ **5.64.15** ॥

सर्वे यथा मां वक्ष्यन्ति समेत्य हरिपुङ्गवाः।
तथास्मि कर्ता कर्तव्ये भवद्भिः परवानहम्॥ **5.64.16** ॥

नाज्ञापयितुमीशोऽहं युवराजोऽस्मि यद्यपि।
अयुक्तं कृतकर्माणो यूयं धर्षयितुं बलात्॥ **5.64.17** ॥

ब्रुवतश्चाङ्गदस्यैवं श्रुत्वा वचनमुत्तमम्।
प्रहृष्टमनसो वाक्यमिदमूचुर्वनौकसः॥ **5.64.18** ॥

एवं वक्ष्यति को राजन् प्रभुः सन् वानरर्षभ।
ऐश्वर्यमदमत्तो हि सर्वोऽहमिति मन्यते॥ **5.64.19** ॥

तव चेदं सुसदृशं वाक्यं नान्यस्य कस्यचित्।
सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम्॥ **5.64.20** ॥

सर्वे वयमपि प्राप्तास्तत्र गन्तुं कृतक्षणाः।
स यत्र हरिवीराणां सुग्रीवः पतिरव्ययः॥ **5.64.21** ॥

त्वया ह्यनुक्तैर्हरिभिर्नैव शक्यं पदात् पदम्।
क्वचिद् गन्तुं हरिश्रेष्ठ ब्रूमः सत्यमिदं तु ते॥ **5.64.22** ॥

एवं तु वदतां तेषामङ्गदः प्रत्यभाषत।
साधु गच्छाम इत्युक्त्वा खमुत्पेतुर्महाबलाः॥ **5.64.23** ॥

उत्पतन्तमनूत्पेतुः सर्वे ते हरियूथपाः।
कृत्वाऽऽकाशं निराकाशं यन्त्रोत्क्षिप्ता इवोपलाः॥ **5.64.24** ॥

अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम्।
तेऽम्बरं सहसोत्पत्य वेगवन्तः प्लवङ्गमाः॥ **5.64.25** ॥

विनदन्तो महानादं घना वातेरिता यथा।
अङ्गदे समनुप्राप्ते सुग्रीवो वानरेश्वरः॥ **5.64.26** ॥

उवाच शोकसन्तप्तं रामं कमललोचनम्।
समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः॥ **5.64.27** ॥

नागन्तुमिह शक्यं तैरतीतसमयैरिह।
अङ्गदस्य प्रहर्षाच्च जानामि शुभदर्शन॥ **5.64.28** ॥

न मत्सकाशमागच्छेत् कृत्ये हि विनिपातिते।
युवराजो महाबाहुः प्लवतामङ्गदो वरः॥ **5.64.29** ॥

यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः।
भवेत् तु दीनवदनो भ्रान्तविप्लुतमानसः॥ **5.64.30** ॥

पितृपैतामहं चैतत् पूर्वकैरभिरक्षितम्।
न मे मधुवनं हन्याददृष्ट्वा जनकात्मजाम्॥ **5.64.31** ॥

कौसल्या सुप्रजा राम समाश्वसिहि सुव्रत।
दृष्टा देवी न सन्देहो न चान्येन हनूमता॥ **5.64.32** ॥

नह्यन्यः कर्मणो हेतुः साधनेऽस्य हनूमतः।
हनूमतीह सिद्धिश्च मतिश्च मतिसत्तम॥ **5.64.33** ॥

व्यवसायश्च शौर्यं च श्रुतं चापि प्रतिष्ठितम्।
जाम्बवान् यत्र नेता स्यादङ्गदश्च हरीश्वरः॥ **5.64.34** ॥

हनुमांश्चाप्यधिष्ठाता न तत्र गतिरन्यथा।
मा भूश्चिन्तासमायुक्तः सम्प्रत्यमितविक्रम॥ **5.64.35** ॥

यदा हि दर्पितोदग्राः सङ्गताः काननौकसः।
नैषामकृतकार्याणामीदृशः स्यादुपक्रमः॥ **5.64.36** ॥

वनभङ्गेन जानामि मधूनां भक्षणेन च।
ततः किलकिलाशब्दं शुश्रावासन्नमम्बरे॥ **5.64.37** ॥

हनूमत्कर्मदृप्तानां नदतां काननौकसाम्।
किष्किन्धामुपयातानां सिद्धिं कथयतामिव॥ **5.64.38** ॥

ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः।
आयताञ्चितलाङ्गूलः सोऽभवद्धृष्टमानसः॥ **5.64.39** ॥

आजग्मुस्तेऽपि हरयो रामदर्शनकाङ्क्षिणः।
अङ्गदं पुरतः कृत्वा हनूमन्तं च वानरम्॥ **5.64.40** ॥

तेऽङ्गदप्रमुखा वीराः प्रहृष्टाश्च मुदान्विताः।
निपेतुर्हरिराजस्य समीपे राघवस्य च॥ **5.64.41** ॥

हनूमांश्च महाबाहुः प्रणम्य शिरसा ततः।
नियतामक्षतां देवीं राघवाय न्यवेदयत्॥ **5.64.42** ॥

दृष्टा देवीति हनुमद्वदनादमृतोपमम्।
आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः॥ **5.64.43** ॥

निश्चितार्थं ततस्तस्मिन् सुग्रीवं पवनात्मजे।
लक्ष्मणः प्रीतिमान् प्रीतं बहुमानादवैक्षत॥ **5.64.44** ॥

प्रीत्या च परयोपेतो राघवः परवीरहा।
बहुमानेन महता हनूमन्तमवैक्षत॥ **5.64.45** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुः षष्टितमः सर्गः॥